অথ একাদশস্তোত্রম
উদীর্ণমজরং দিব্যমমইতস্যংদয়ধীশিতুঃ ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ১ ॥
সর্ববেদপদোদ্গীতমিন্দিরাধারমুত্তমম ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ২ ॥
সর্বদেবাদিদেবস্য বিদারিতমহত্তমঃ ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৩ ॥
উদারমাদরান্নিত্যমনিন্দয়ং সুন্দরীপতেঃ ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৪ ॥
ইন্দীবরোদরনিভং সম্পূর্ণং বাদিমোহনম ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৫ ॥
দাতইসর্বামরৈশ্বর্যবিমুক্ত্যাদেরহো বরম ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৬ ॥
দূরাদ্দূরতরং যত্তু তদেবান্তিকমন্তিকাত ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৭ ॥
পূর্ণ সর্বগুণৈকার্ণমনাদ্যন্তং সুরেশিতুঃ ।
আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদ্যভি বন্দিতম ॥ ৮ ॥
আনন্দতীর্থ মুনিনা হরেরানন্দ রূপিণঃ ।
কইত স্তোত্রমিদং পঠন্নানন্দমাপ্নুয়াত ॥ ৯ ॥
॥ ইতি শ্রীমদানন্দতীর্থভগবত্পাদাচার্য বিরচিতং দ্বাদশস্তোত্রেষু
একাদশস্তোত্রং সম্পূর্ণং ॥